नं० ४८६६

नाम- रुद्रयामलतंत्रे भवानीपूजापद्धतिः

कर्त्ता- ×

पत्र संख्या- १३ पत्राणि सं० ×

विषयः- तंत्रम्

भवानीपूजापद्धतिः रुद्रयामले

षप ६६

4866

Page-13

Missing Pages 6, 7, 8, 9

ॐ श्रीगणेशायनमः गुरवेनमः ब्राह्मेमुहूर्त्तेचोत्थाय बद्धपद्मासनःसुधीः शिरस्थेश्वेतपद्मे वै कमलेचिंतयेद्गुरुं १ तथा
ध्या त्वच्छिरसिश्वेतकमलेकर्णिकाभ्यंतरे निजंगुरुं यथारूपं वराभयकरं रक्तशक्त्यंकितवामांकं ध्यात्वा मानसैरुपचारैरभ्यर्च्य गुरुमंत्रंजपेद्यथा
ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयुं हसखफ्रें हसक्षमलवरयीं अमुकानंदनाथाय अमुकीदेव्यंबाश्रीपादुकां पूजयामि नमः इति गुरुपादुका
मंत्रं दशधाजप्त्वा गुह्येतिमंत्रेण समर्प्य स्तुवीत अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः १ न
मोस्तु गुरवे तस्मै स्वेष्टदेवस्वरूपिणे यस्य वागमृतं हंति विषं संसारसंज्ञकं मिति प्रणम्य स्तुवीत नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे विद्या
वतारसंसिद्ध्यै स्वीकृतानेकविग्रहः १ नवाय नवरूपाय परमार्थैकरूपिणे सर्वज्ञानतमोभेदभानवे चिद्घनाय ते २ स्वतंत्राय दयाक्लृप्तविग्रहा
य शिवात्मने परतंत्राय भक्तानां भव्यानां भव्यदायिने ३ विवेकिनां विवेकाय विमर्शाय विमर्शिणां प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञान
रूपिणे ४ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः सदा मच्चित्तभावेन विधेहि भवदासनं ५ त्वत्प्रसादादहं देव कृतकृत्योस्मि सर्वतः
मायामृत्युमहापाशाद्विमुक्तोस्मि शिवोस्मि च ६ इति स्तुत्वा नत्वा प्रातःप्रभृति सायांतं सायादि प्रातरंतं यत्करोमि जगन्नाथ तदस्तु तव पू
जनं १ इति सर्वं गुरवे निवेद्य तदाज्ञां गृहीत्वा तत्पादरसवलितामृतधारया क्षालितं निर्मलमात्मानं विचिंतयेत् अथ मूलाधारस्य चतुर्दलक
मलकर्णिकांतर्गतत्रिकोणमध्यस्थितां अधोमुखस्वयंभुलिंगवेष्टिनीं प्रसुप्तभुजगाकारां शंखावर्त्ताकारेण सार्धत्रिवलयां तडित्कोटिप्र
भां बिसतंतुतनीयसीं मूलविद्याप्रकृतिभूतां कुंडलिनीं इष्टदेवतारूपां हूंबीजेन त्रिकोणाग्निना सचेतनां कृत्वा सुषुम्णावर्त्मना

ख हूँ

द्वादशांतं नीत्वा ब्रह्मरंध्रस्थसहस्रदलकमलस्थेन परमशिवस्थेन संयोज्य तत्रस्थचंद्रमंडलाद्विगलदमृतधारयासंतर्प्य अस्या इति करषडंग
न्यासपूर्वकं हृदयकमले द्वादशदले कुंडलिनीमानीय देवीरूपेणावस्थमारणप्रकारेणाध्यात्वा मानसैः गंधाद्युपचारैरभ्यर्च्य मूलं वा नाय
श्रीमत्पंचविंशतिधा वा प्रजप्य गुह्येति मंत्रेण देवीवामकरे समर्प्य कृत्वा नत्वा देव्या आज्ञां प्रार्थयेत् त्रैलोक्यचैतन्यमयि परमेश्वरि हे विष्णुमातर्भव
दाज्ञयैव प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये १ इति संप्रार्थ्य अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् सच्चिदानंद
रूपोऽहमात्मानमिति विचिंतयेत् १ इति गुरुदेवतात्मनामैक्यं संभाव्य नमः समुद्रमेखले देवि पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं पादस्प
र्शं क्षमस्व मे २ इति संप्रार्थ्य श्वासानुसारेण भूमौ पादं कृत्वा बहिर्व्रजेत् इति प्रातःकृत्यं यथाविधि शौचमाचरय ह्रीं बीजेन दंतान्विशो
ध्य क्लीं बीजेन मुखं प्रक्षाल्य श्रीं बीजेन गंडूषान्त्यजेत् ततस्तीर्थादौ गत्वा हस्तौ पादौ प्रक्षाल्य आचम्य मूलेन मृत्तिकां गोपिलिप्य मला
पकर्षणं स्नात्वा श्रीं आत्मतत्त्वाय स्वाहा ह्रीं विद्यातत्त्वाय स्वाहा क्लीं शिवतत्त्वाय स्वाहा इत्याचम्य संकल्पं कुर्यात् यथा ॐ अद्य अमुके मा
सि अमुके पक्षे अमुकतिथौ अमुकवासरे अमुकदेवताप्रीतये अमुकतीर्थस्नानमहं करिष्ये इति संकल्प्य जले त्रिकोणं विभाव्य गंगे च य
मुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि जलेऽस्मिन्सन्निधिं कुरु १ ॐ रत्नाकरगामिन्यो याः तीर्थास्ता आवाह्य तत्र ऐं श्रीं ह्सौः क्लीं देवि भवानि
परिवारसहिते अस्मिन् जले सन्निधिं कुरु २ स्वाहा इति देवीमावाह्य क्लीं बीजेनावगुंठ्य कुंडिनि संरक्ष्य धेनुमुद्रां प्रदर्श्य ह्रीं बीजमुच्चरन्
देवीं सावरणां तर्पयन् नमादरस्वर्णोल्लासात्तराजलं विभाव्य सद्विद्यां लिखित्वा मूलमुच्चरन् निमज्ज्य मूलेन दशधा अंजलिमुद्रया शिरसि
संप्रोक्ष्य ... ततो जलादुत्तीर्य शुद्धदेहं विभाव्य धौतवाससी परिधाय संध्यावंदनं कुर्यात् तद्यथा एवं

बद्धावक्ष्य ॐ मणिधारिवज्रिणिशिखरिणिमहाप्रतिसरे रक्ष २ हुं फट् स्वाहा इति शिखां बध्वा मूलेन तिलकं कृत्वा षडंगं विधाय वामहस्ते जलं
गृहीत्वा दक्षिणहस्तेनाच्छाद्य हं यं रं वं लं इति त्रिरभिमंत्र्य मूलमुच्चरन् गलितोदकबिंदुभिः सप्तधा मुद्रया मूर्द्ध्नि सप्तधाभ्युक्षणं कृत्वा शेषजलं
दक्षिणहस्ते समादाय तेजोरूपं जलं ध्यात्वा इड्यादेहान्तः पापं प्रक्षाल्य कृष्णवर्णं तज्जलं पिंगलया विरेच्य पुरः कल्पितायां वज्रशिलायां फडिति निःक्षिपेत्
हस्तौ प्रक्षाल्याचम्य सूर्यायार्घं दद्यात् ॐ ह्रां ह्रीं हंसः सूर्याय एष ते अर्घो नमः इति सूर्या·र्घत्रयं दत्वा ततस्ताम्रपात्रे तिलाक्षतजपापुष्पगंधजलादिना
र्घं विधाय सूर्यमंडले देवीं संभाव्य गायत्र्या ते उद्यदादित्यवर्त्तिन्यै शिवचैतन्यमयै श्री आद्याभवान्यै एष ते अर्घो नमः इत्यर्घत्रयं दत्वा गायत्रीं जपेत्
ह्रीं भवानि विद्महे भगवत्यै धीमहि तन्नः शक्तिः प्रचोदयात् इति गायत्रीं यथाशक्ति जपित्वा गुह्येति मंत्रेण समर्प्य नमस्कृत्य अथ ध्यानं प्रा
तः संध्यायां उद्यदादित्यसंकाशां पुस्तकाक्षधरीं स्मरेत् कृष्णाजिनधरां ब्राह्मीं ध्यायेत्तारकितांबरे इति प्रातः। मध्याह्ने पुस्तकावरधरां दिव्यां ध्या
सनहस्ताभयां त्रिनेत्रां वरदाभयकरीं पाशांकुशं बिभ्रतीं करे दधानां सूर्यमंडलमध्यस्थां ध्यायन् देवीं समभ्यसेत्। अथ सायाह्ने चतुर्भुजां श्यामवर्णां
शंखचक्रलसत्करां गदापद्मधरां देवीं सूर्यासनकृताश्रयां। इति संध्याविधिः॥ अथ तर्पणं। आचम्य जले जंध्या तत्र देवीमावाह्य ॐ प्रल
भैरवस्तर्पयामि विल्फभैरवस्तर्पयामि रुद्रभैरवस्तर्पयामि हसक्षमलवरयं आनंदभैरवाय वषट् आनंदभैरवस्तर्पयामि हसक्षमलवरयं सुधादेव्यै व
षट् आनंदभैरवीं तर्पयामि इति देवतर्पणं अथ ऋषितर्पणं महादेवानंदस्तर्पयामि महादेवानंदनाथस्तर्पयामि त्रिपुरानंदस्तर्पयामि भैरवानं
दनाथ· धर्मानंद· पर्णदेवानंद· बलविमानंद· बलाबलानंद· कुमारानं· क्रोधानं· वरदानं· स्मरदीपनानं· मायावानं· मायादेवानं· विमला
नंद· कुशलानं· भीमसेनानं· सुधाकरानंद· मीनानं· गोरक्षानं· भोजदेवानं· प्रजापत्यानंद· मूलदेवानं· रतिदेवानं· विघ्नदेवानं· हुताशनानं०
समयानंदसंतोषानंदनाथास्तर्पयामि इति दिव्यौघसिद्धौघमानवौघान् संतर्प्य निजगुरुं चतुष्कं संतर्प्य ततो देवीं मूलेन सशिवासनं तर्पयेत्॥

प॰ एकैकांजलिना परिवारान्संतर्प्य पूर्वेण तत्र शक्तिं वा मूलांते सांगां सपरिवारां सवाहनां सालंकारां सायुधां सदाशिवसहितां श्रीश्रीभवानीदेवीं स्त
२ र्पयामीति द्वाभ्यां वा चाभ्यां संतर्प्य ततः सूर्यवत् सूर्यायार्घं दत्त्वा प्रणम्यासनं गृहीत्वा यागगृहमागत्य द्वारपूजामारभेत् हस्तोपात्ते प्रक्षाल्यार्घ्य
स्थजलैरेकेन प्रणवेन द्वारं संप्रोक्ष्य द्वारोर्ध्वोदुंबरमध्ये गं गणपतये नमः सं सरस्वत्यै नमः तत्कोणयोः वं वटुकाय नमः क्षं क्षेत्रपालाय नमः एवं गं गं
गायै नमः यं यमुनायै नमः शं शंखनिधये नमः पं पद्मनिधये नमः अस्त्राय फट् देहल्यै नमः इति देहल्यां इति क्रमेण गंधादिना द्वारदेवताः संपूज्य द्वार
पार्श्वे देहल्यां द्वारं स्पृशन् यत्नतः निवार्य विघ्नसंघातमिमं मंत्रं परमेश्वरि इति देवताभ्यां भावयित्वा वामांगं संकोचयन् वामशाखां स्पृशन् वामांघ्रि
णांतः प्रविश्य अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशः ये चात्र निवसंत्यन्ये देवता भुवि संस्थिताः अपसर्पंतु ते भूता ये भूता भूमिसंस्थिताः ये भू
तविघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॐ सर्वविघ्नानुत्सारयोत्सारय हुं फट् इति शर्षपान्विकीर्येति सर्षपान्विकीर्य ततो मूलमंत्रेण वामपार्ष्णिघा
तेनोर्ध्वतालत्रयेण त्रिमेघराहितं दृष्ट्वा व भौमांतरिक्षादिमान्विघ्नानुत्सार्य नैर्ऋत्ये वास्तुपुरुषाय नमः ईशानकोणे क्षेत्रपालाय नमः धात्रे
नमः अग्नेये विधात्रे नमः वायव्ये इति गंधादिना संपूज्य नीलजीमूतसंकाशं महाकायं कल्पांतदहनोपमं भैरवाय नमः इति मंत्रेणानाहूय दारुण महंसि ॐ
रक्ष २ हुं फट् स्वाहा इति भूमिं परिविक्ष्य गायत्र्या भूमिमभिमंत्र्य तत्र त्रिकोणं विलिख्य ॐ ह्रीं आधारशक्त्यै नमः ॐ ह्रीं कमलासनाय न
मः अनंताय नमः कूर्माय नमः वराहाय पृथिव्यै इति गंधादिना संपूज्य कंबलाद्यासनं संस्थाप्य आग्नेयादिकोणेषु प्रादक्षिण्येन
गं गणेशाय नमः सं सरस्वत्यै नमः दुं दुर्गायै नमः क्षं क्षेत्रपालाय नमः इत्यासनं संपूज्य हस्तेन धृत्वा आसनमंत्रस्य मेरुपृष्ठऋषिः
सुतलं छंदः कूर्मो देवता आसनोपवेशने विनियोगः पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं इति
पठित्वा विघ्नं हृत्वा कमलासनसंस्थितः ततः ऊर्ध्वं कृत्वा आवाम वामे गणेशाय नमः दक्षिणे गुरुभ्यो नमः वामे दुर्गायै शिव॰ २

दक्षेऽतं सेनपालायनमः अग्रे इष्टदेवतायै नमः वामे अर्घ्यं संस्थाप्य किंचिज्जलं प्रोक्षिणीपात्रे निधाय तेन जलेनात्मानं द्रव्योपकरणांश्च प्रोक्षयेत् स्वदक्षभागे
पुष्पादिकं स्वपृष्ठभागे करप्रक्षालनार्थं पात्रं देवतापृष्ठभागे जलद्रव्याणि संस्थाप्य वामे आचमनीयपात्रं पुष्पकेतुराजाहिते नामाय समस्त संप्रदायेति का
मनायत्राप्युष्पवृष्टिं विधाय ॐ कामदेवाय विद्महे क्लीं पुष्पबाणाय धीमहि तन्नोऽनङ्गः प्रचोदयात् हंसहुंफडिति मंत्रेण नाराचमुद्रया समभिदृष्ट्वा विलोकने
न गंधादिसर्वसंभारशुद्धिं विधाय ईशानकोणे त्रिकोणं चतुरस्रं दलाष्टकं कुंकुमेन मंडलं विरच्य आधारं संस्थाप्य तस्योपरि आधारोपरि दीपपात्रं संस्थाप्य
सद्वेगाद्यतंतुनावर्तिकयानेतेन दीपं प्रज्वाल्य पात्रे स्थाप्य पूजयेत् गंधकेन गंधपुष्पाभ्यां संपूज्य अग्निमंत्रेण दीपशिखां स्पृष्ट्वा हंसः सोऽहं मंत्रेण कर्पूर
सः २ हुं फट् स्वाहेति कायवाक्चित्तविघ्नशोधनं विधाय रः २ हुं फट् स्वाहेति हृदि हस्तं दत्त्वा आत्मरक्षां विधाय चंदनादिपुष्पाणि कराभ्यां मर्दयित्वा ना
निवामकरे समादाय आघ्राय तेसर्वे विलयं यान्तु ये मां हिंसन्ति हिंसकाः मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके इति मंत्रेणैशान्यां दिशि दूरतः क्षिप
त्वा मूलमंत्रेण तालत्रयं दिग्बंधनं कृत्वा पूर्ववदासनाभिमंत्रणं कृत्वा मंत्रेण प्राणायामत्रयं कुर्यात् यथा पूरकं षोडशवारं कुंभकं चतुःषष्टि
वारं रेचकं द्वात्रिंशद्वारं प्रयोगेन प्राणायामत्रयं कृत्वा भूतशुद्धिं समाचरेत् अथ भूतशुद्धिः यथा हुंकारेण मूलाधारात्कुंडलिनीमुत्थाप्य जीवा
त्मानं संयोज्य हंस इति मंत्रेण परमात्मनि विलापयेत् ततः पादादिजानुपर्यंतं स्थितां पृथ्वीं जान्वादिनाभिपर्यंतं स्थितासु प्रविलापयेत् तां
नाभ्यादिहृदयपर्यंतं स्थिते वह्नौ तं वह्निं हृदयादिभ्रूमध्यान्तं स्थिते वायौ तं च भ्रूमध्यादिब्रह्मरंध्रान्तं स्थिताकाशे तं चाहंकारे तं च महत्तत्त्वे तं च प्रकृ
तौ तां च ब्रह्मणि प्रविलापयेत् ततः पापपुरुषं चिंतयेत् वामकुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्महत्याशिरस्कं स्वर्णस्तेयभुजद्वयं
सुरापानहृदयं गुरुतल्पकटिद्वयं तत्संयोगकटिद्वंद्वमंगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रुविलोचनं खड्गचर्मधरं पाप

३

मं गुरुरूपपरिमाणकं अधोवक्त्रं कमलवत्संस्थाप्य कुंभकेन विचिंतयेत् ततो यमिति बीजेन षोडशवारमावर्तनेन वामनासया वायुमापूर्य सपापं दे
हं विशोष्य रमिति बीजं चतुःषष्टिवारमावर्तनेन कुंभकप्रयोगेण सपापं देहं दग्ध्वा पुनर्यमिति बीजेन द्वात्रिंशद्वारमावर्तनेन दक्षनासया सपापप्रुरु
षभस्म रेचयेत् ततो वमिति बीजेन ललाटचंद्रमण्डलात्कावर्णामयीममृतधाराभिः निःपात्य भस्म आप्लाव्य सकलमेरुगावयवान् क्लिन्नान् पा
द्य लमिति बीजेन पार्थिवं कृत्वा हमित्याकाशबीजेन व्यापकं विचिंत्य ततः परमात्मनः सकाशात्प्रकृतिस्तस्या महत्तत्त्वं ततोऽहंकारं तस्मा
दाकाशं ततो वायुस्तस्मात्तेजस्तस्माज्जलं तस्मात्पृथिवीं निर्गम्य स्वस्वस्थाने स्थापयित्वा सोऽहमिति मंत्रेण जीवात्मानं प्रदीपकलिका
कारं कुंडलिनीद्वारात् हृदयकमलमानीय कुंडलिनीं मूलाधारे स्थापयित्वा स्वशरीरं निरस्तसमस्तकिल्बिषं देवताराधनयोग्यं विभाव
येदिति भूतशुद्धिः अथ प्राणप्रतिष्ठा तद्यथा आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः अमुष्य प्राणा इह प्राणाः अमुष्य जीव इह स्थितः अमु
ष्य सर्वेंद्रियाणि अमुष्य वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति मंत्रः अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मवि
ष्णुमहेश्वरऋषयः ऋग्यजुःसामाथर्वाणि छंदांसि प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं मम प्राणप्रतिष्ठार्थे विनियो
गः इति करसंपुटेन शिरसि ब्रह्मविष्णुमहेश्वरेभ्यो ऋषिभ्यो नमः मुखे ऋग्यजुःसामाथर्वच्छंदोभ्यो नमः हृदि प्राणशक्तिदेवता
यै नमः गुह्ये आं बीजाय नमः पादयोः ह्रीं शक्तये नमः सर्वांगे क्रों कीलकाय नमः इति न्यस्य ततः आं ह्रीं क्रों अं कं खं गं घं ङं आं आकाशवा
य्वग्निसलिलपृथिव्यात्मने अंगुष्ठाभ्यां नमः आं ह्रीं क्रों इं चं छं जं झं ञं ईं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां स्वाहा आं ह्रीं शिवः
क्रों उं टं ठं डं ढं णं ऊं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां नमः आं ह्रीं क्रों एं तं थं दं धं नं ऐं वचनादानविहरणोत्सर्गानंदात्मने ऐं अनामिका ३

लं प्राणात्मने· सं परमात्मने·

ॐ

भ्यां नमः श्रां ह्रीं क्रों श्रों यं· वचनादानविसर्गगमनानंदात्मने ऐं वौं कनिष्ठिकाभ्यां नमः श्रां ह्रीं क्रों ग्रं यं ट मनोबुध्यहंकारचित्

तात्मने अः करतलकरपृष्ठाभ्यां नमः इति करन्यासः एवं हृदयादि ॥ आं नाभिमारभ्य हृदयान्तं न्यसेत् ह्रीं हृदयमारभ्य

आननपर्यंतं· क्रों हृदयमारभ्य भ्रूं द्वितयं न्यसेत् अथ दाशारदायां नाभेश्चरणाय यं न्यसेत् पाशबीजं प्रविन्यसेत् हृदयान्नाभिप

र्यंतं शक्तिबीजं ततः परं मूर्ध्नादि हृदयं यावदंकुशं विन्यसेत्ततः ॥ हृदये धातुसप्तकं यथाक्रमं यादिसप्तवर्णान् धातोश्च जीवं हंस इति

वर्णान् हृदयं पृथक् न्यसेत् समस्तेन व्यापकं कुर्यात् यं त्वगात्मने नमः रं रक्तात्मने नमः लं मांसात्मने नमः वं मेदात्मने नमः शं

अस्थ्यात्मने नमः षं मज्जात्मने नमः सं शुक्रात्मने नम हं जीवात्मने नम सः प्राणात्मने· ध्यानं रक्ताम्भोधीति· अथ वा शा पि

रदायां ध्यानं ॥ रक्ताब्धिपोतारुणपद्मसंस्था पाशांकुशाविक्षुशरासबाणान् शूलं कपालं दधती कराग्रै रक्ता त्रिनेत्रा प्रणमामि

देवीं १ एवं ध्यात्वा त्रिकोणे शक्तिपीठे देवीमावाह्य पूजयेत् ब्रह्मणे नमः विष्णवे नमः ईश्वराय नमः इति कोणत्रये सरस्वत्यै नमः

लक्ष्म्यै नमः उमादेव्यै नमः इति कोणत्रये नत्वांगषट्कं पूजयेत् हृदि शिरः शिखा कवच नेत्र अस्त्र इति पूजयेत् तद्बहिरष्टदलेषु

ब्राह्म्यादयः तद्बहिर्लोकपालाः यथाशक्ति जपित्वा विसर्जयेत् ध्यानमुनेश्च तन्मे दशांशो होमः एवं संपूजयेद्देवीं स्रग्गंधकुसु

मादिभिः इति संसाधितो मंत्रः षट्कर्मफलदो भवेत् स्थापयेन्मनुनानेन प्राणान् सर्वत्र देशिकः वीजितेमम शब्दान्तमादाहृतौ

प्रपूजयेत् स्मरन्नेव स्वतनौ भूयो जीव प्राणाधानम् अत्र कुण्डाग्रसमापश्चात् प्रमदादि स्फुलिंगिनी सेत्र प्रतिहारान्ता प्राणा

४ दुन्धोनवस्तुनोः पाशेनबद्धे वेद्वस्य शक्त्यास्वीकृतवेनसः अंकुशेनाहृतन्थामिसाध्यः स्यात्सममाहरेत् द्वादशांगुलमानेन
ल कृत्वा साध्यपुत्तलीं तस्यां प्राणात्मकं पंचं संकटहृदये न्यसेत् निशीसमये साध्येन्तत्वेनस्य हृदांबुजो दलेषु वा पुवह्नीद्व
रस्नानामतः परं ईश्वराक्षस शीतांशु यमानां कास्मिं कांतरे याद्दीन्हसमायुक्तान्नभंगीकारमाद्रस्मरन् शिरोविन्दुसमु
दूनतंतु सबद्धविद्धवियहान् एवमात्महंभौजेभगिरूपाधियांस्मरेत् आत्महृदयप्रगाम्नगी प्रस्थाप्य वात्मवर्त्मना एवं
नीसाध्यहृद्गाल्लनसंतांभये दुविन्दूरकमंसपुत्तल्यानेषां स्थापनमीरितं प्राणान्साध्यस्य भंडूकान्ध्यात्मनस्तं
देवतायै भुजंगमतं इतिप्राणाप्रतिष्ठा अथतत्कान्यासः तत्रविनियोगं कृत्वा· शिरसिब्रह्मणेऋषयेनमः मुखेगायत्रीछंद
सेनमः हृदयेश्रीमातृकासरस्वत्यैनमः· गु· हल्भ्योवीजेभ्योनं· पादयोस्वरेभ्यः शक्तिभ्यो· नाभौ श्राव्यक्ताय कीलकाय·
इतिविन्यस्य अंगुष्ठयोरकंखंगंघंङं· आं हृदयायनमः तर्जन्योः ईचंछंजंझंञंई [illegible] शिरसेस्वाहा मध्यमयोः उंटंठंडंढंणंऊं शि
खायैवषट् अनामिकयोः एंतं ५ ऐं कवचायहुं कनिष्ठयोः ओंपं ५ औं नेत्रत्रयायवौषट् करतलकरपृष्ठयोः अंयं ८ अः अ
स्त्रायफट् इतिकाराग्न्यासो विन्यस्य अस्त्रमंत्रेणदिग्बंधनं कृत्वा ध्यायेत् रसनार्त्मकोर्मिकमवांढदेस्फुरत्केसरं पत्रांतर्गत
पंचवर्गयशेलानादिस्विवर्णं क्रमात् आशास्वस्ति वलीनत्वांगलिङ्गजातोत्राणीपरेणहतंवर्णम्ज्वं शिरसि स्थितांविपगन्द्रव
विमस्तुजपं इतिब्रह्मरंध्रेवर्णसरिपद्ध्यात्वा मूलाधारघपिमिं कृत्वा शक्तिकुण्डलिनीं जलनपावक संकाशा सूक्ष्मतेजस्वरूपि शिवः
णी मूलाधारादि [illegible] एप शतीविद्युदाकृती तयास्य ब्रह्मशिरःपद्मादमृतौघस्वरूपिणी निर्गतान्मातृकावर्णा· ४

रक्तगुणस्थावर्णमालातनुं भावयित्वा स्थितमास्तर्वनिवेत्यर्थः आत्मानं प्रविन्यसेत् आधारे लिंगनाभौ प्रकटितहृदये तालुमूले ललाटे द्वे पत्रे
षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणां हंक्षं तत्त्वार्थयुक्तं सकलदलगतं वर्णरू-
पं नमामि इति सूक्ष्मरूपां वर्णमातृकां ध्यात्वा कंठे विशुद्धचक्रे षोडशदलकमले सूक्ष्मरूपं ध्यात्वा तद्दलेषु पूर्वादि प्रादक्षिण्येन ॐ अं
नमः ॐ आं नमः ॐ इं नमः ॐ ईं नमः ॐ उं नमः ॐ ऊं नमः ऋं नः ॠं नः ऌं नमः ॡं नः एं नः ऐं नः ओं नः औं नः अं नः अः नमः इति विशुद्धस्य हृ-
दये अनाहतचक्रे द्वादशदलकमलं ध्यात्वा तद्दलेषु पूर्वादि प्रादक्षिण्येन ॐ कं नमः ॐ खं नमः एवं गं घं ङं चं छं जं झं ञं टं ठं ततो नाभिकमले
दशदलकमलं मणिपूरकचक्रं प्राग्वद्ध्यात्वा तद्दलेषु पू० प्राद० ॐ डं नमः एवं ढं णं तं थं दं धं नं पं फं इति विशुद्धस्य लिंगमूले स्वाधिष्ठानचक्रे
षड्दलकमलं ध्यात्वा तद्दलेषु पू० प्रादक्षि० ॐ बं नमः एवं भं मं यं रं लं ततो मूलाधारचक्रे चतुर्दलकमलं तद्दले द्वान्तरे ध्यात्वा ॐ वं नमः एवं
शं षं सं ततो भ्रूमध्ये आज्ञाचक्रे द्विदलकमलं तद्दलयोः ॐ हं नमः क्षं नमः इत्यन्तर्मातृका अथ बहिर्मातृकान्यासं कुर्यात् एवं ध्यात्वा
तत्र ध्यानं पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदातां अक्षस्रक्कुंभचिंता-
लिखितवरकरां त्रीक्षणां पद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि १ दक्षोर्द्धकरमारभ्य वामाधःकरपर्यंतमाऽ
धध्यानं विनालिखितपुस्तकं इति पूर्वोक्तध्यानरे ध्रस्य वरदाभयरविंदमातृकासरस्वतीं ध्यात्वा शिरसि ॐ अं नमः मुखवृत्ते ॐ आं न-
मः दक्षनेत्रे इं नमः वामनेत्रे ईं नमः दक्षिणकर्णे उं नमः वामे ऊं नमः दक्षनासापुटे ऋं नमः वामे ॠं नमः ओष्ठे ऌं नमः अधरे ॡं नमः

ऊर्ध्वदन्ते ओं नमः अधोदन्ते औं नमः तालुमूले अं नमः जिह्वाग्रे अः नमः क्रमेण दक्षबाहुमूलसंधिकूर्पराग्रेषु कं नमः एवं खं गं घं ङं क्रमे
ण वामबाहुमूलसंधिकूर्पराग्रेषु चं नमः एवं छं जं झं ञं क्रमेण दक्षपादमूलसंधिकूर्पराग्रेषु टं नमः एवं ठं डं ढं णं वामपादमूलसंधि
कूर्पराग्रेषु तं नमः एवं थं दं धं नं दक्षिणपार्श्वे पं नमः वामे फं नमः पृष्ठे बं नमः [struck] नाभौ भं नमः जठरे मं नमः हृदये यं नमः दक्षां
से रं नमः ककुदि लं नमः हृदयादिदक्षिणकराग्रपर्यन्तं शं नमः हृदयादिवामकराग्रपर्यन्तं षं नमः हृदयादिदक्षिणपादाग्रपर्यन्तं सं नमः हृदयादिवा
मपादाग्रपर्यन्तं हं नमः लं हृदयादिनाभ्यन्तं हृदयादिमूर्द्धान्तं क्षं १ इति कलामातृकान्यासः अथ केवलबिन्दुमातॄणां मन्त्राणां वीर्य
यो तनार्थमिति संप्रदायः अथ बिन्दुमातृकान्यासः तत्र ध्यानादिकं पूर्ववत् ध्यानं त्वेवं अरुणजलजहरिणापोतमुद्राक्षकं ८
विद्याकरैरविरतं दधतीं त्रिनेत्रां अर्द्धेन्दुमौलिमरुणामरविन्दवासां वर्णेश्वरीं प्रणमत स्तनभारनम्रां १ दक्षार्धकरपोतघनादा
घधःकरपोत्प्रसेन धूमांगी मुक्तकेशी मलिनमलिनमुखी [struck] घोररूपां त्रिनेत्रां असौ हरौ दधानां अजनकरधृतां दी
प्तमग्नीत्रिशाढ्यां हाहाकाराट्टहासामभयवरकरां ज्वालयन्तीं दिशाश्च भक्तेभ्यः प्रेमवज्रां दिशतु प्रतिदिनं भारतीं तां नमामि १
इति वरणारविंदे ध्यात्वा मूर्द्धादिहृदयान्तं सं नमः नाभ्यादिहृदयान्तं लं नमः वामपादाग्रादिहृदयान्तं हं नमः दक्षिणपादादिहृदयान्तं
सं नमः वामबाह्वादिहृदि षं नमः दक्षबाह्वादिहृदयान्तं शं नमः वामांसे वं नमः ककुदि लं नमः दक्षिणांसे रं नमः हृदि यं नमः उ
दरे मं नमः नाभौ भं नमः पृष्ठे बं नमः वामपार्श्वे फं नमः दक्षिणपार्श्वे पं नमः वामपादाग्रगुल्फाग्रे नं नमः अंगुलीमूले धं नमः गुल्फे दं न शिवः
जानुनी थं नमः वामपादमूले तं नमः दक्षपादाग्रगुल्फाग्रे णं नमः अंगुलीमूले ढं गुल्फे डं नमः जानुनि ठं नमः पादमूले टं नमः वामबाहुगुल्फ ५

तत्र ॐ सोममंडलाय षोडशकलात्मने नमः इति संपूज्य कलाः पूजयेत् अं अमृतायै नमः आं मानदायै इं पूषायै ईं तुष्ट्यै उं
पुष्ट्यै ऊं रत्यै ऋं धृत्यै ॠं शशिन्यै ऌं चंद्रिकायै ॡं कान्त्यै एं ज्योत्स्नायै ऐं श्रियै ओं प्रीत्यै औं अंगदायै अं पूर्णायै नमः
अः पूर्णामृतायै इति गंधादिना संपूज्य त्रिकोणवृत्तषट्कोणं तन्मध्ये कुंकुमेन लिखित्वा त्रिकोणरेखायां अं १६ कं २६ थं
१६ इति विलिख्य मध्ये हंसं लिखित्वा मूलखंडत्रयेण त्रिकोणं संपूज्य षट्कोणे षडंगं पूजयित्वा गंगे च यमुने मंत्रेणांकु
शमुद्रया सूर्यमंडलात्तीर्थ[illegible]मावाह्य आनंदभैरवानंदभैरवीं तन्मंत्रेण संपूज्य दूर्वादिक्रमेण पंचरत्नं पूजयेत् यथा ह्लूं
गगनरत्नेभ्यो नमः ह्लें स्वर्गरत्नेभ्यो नमः ह्रूं पातालरत्नेभ्यो नमः ह्लूं मर्त्यरत्नेभ्यो नमः ह्लें नागरत्नेभ्यो नमः इति सं
पूज्य तत्रैव अखंडैकरससंभृतमशेषरससंमतं आपूरितं मया पात्रं पीयूषरसमावह १ अखंडैकरसानंदकरे प
रसुधात्मनि स्वच्छंदस्फुरणामत्र निधेह्यमृतरूपिणी अकुलस्थामृताकारे सिद्धिज्ञानकरे परे अमृतत्वं निधेह्यस्मिन्
वस्तुनि क्लिन्नरूपिणी २ तद्रूपेणैकरस्यात्वं दत्वाखेतत्स्वरूपिणी भूत्वा कुलामृताकारे मयि चित्स्फुरणं कुरु
पुनरानंदभैरवानंदभैरवीं संपूज्य मूलेन सप्तवाराभिमंत्र्यास्त्रेण संरक्ष्य कवचेनावगुण्ठ्य अमृतबीजेनामृतीकृत्य सं
योनिमुद्रां प्रदर्श्य मूलेन गंधादिना संपूज्य नमस्कृत्य इति विशेषार्घ्यं कलशविशेषार्घयोर्मध्ये गुरुपात्रं विशेषा

10

र्धउत्तरः भोगपात्रं शक्तिपात्रं योगिनीपात्रं भैरवबलिपाघ श्रवमृतीयपात्रं प्रोक्षिणीपात्रं सामान्यार्घ्यवत्स्थापय
येत् स्वात्मपूजनं गंधादिभिः संपूज्य शिवादिगुरुभ्यो नमः इत्यनेन शिरसि पुष्पांजलिं क्षिप्त्वा तत्रैव गुरुं संत
र्प्य हृदि स्वेष्टदेवीं संपूज्य हस्तं हस्ततले संहृत्य त्रिकोणात्मके यंत्रे विलिख्य तस्याग्रहस्ते वाममध्ये शुकला
यसदृशीं शुद्धिं निधाय वामहस्तमध्यमांगुष्ठानामिकाभिः स्वीकुर्याद्यथा पूर्णाहंकारबुद्धिमनःश्रोत्रत्वक्
चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थाः शब्दस्पर्शरूपरसगंधाकाशवायुतेजःसलिलभूम्यात्मने [illegible]
क्रौं आत्मतत्त्वायात्मतत्त्वेन विश्वरूपात्मने शारदाब्रह्मसहिताय शारदाब्रह्मतत्त्वात्मने आसवमलशोधनार्थं स्थूलदे
हं शोधयामि स्वाहा मूलाधारेऽग्निमंडले गृहस्था स्वीकुर्यात् मयाकलाविद्यारागकालनियतिपुरुषात्मने [illegible]
के २५ क्लीं विद्यातत्त्वाय विद्यातत्त्वात्मने लक्ष्मीनारायणसहिताय लक्ष्मीनारायणसहितात्मने कार्मिककमलशो
धनार्थं सूक्ष्मदेहं शोधयामि स्वाहा हृदये सूर्यमंडले इति राश्यां २३ शिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मने भ्रूकुटेः
ष २६ सौः शिवतत्त्वात्मने प्रासादपुरुषाय प्रासादपुरुषात्मने उमामहेश्वरसहिताय उमामहेश्वरसहितात्मने मायाम
लशोधनार्थं कारणदेहं शोधयामि स्वाहा ब्रह्मरन्ध्रे चंद्रमंडले ३ शिवादि षट्त्रिंशत्तत्त्वान्तर्वार्यं भ्रू २६ ऐं क्लीं सौः
सर्वतत्त्वाय सर्वतत्त्वात्मने विश्वतेजसप्राज्ञपुरुषाय विश्वतेजसप्राज्ञपुरुषात्मने शारदाब्रह्मलक्ष्मीनारायणोमामहे

श्रीवः
१०

भ्यरसंहितात्मने आत्मतत्त्वकार्मिकमायामलशोधनार्थं तनुत्रयाशुद्धं जीवं शोधयामि स्वाहा सर्वांगं सर्वमंडलेत्यनेन मध्यस्थात्वीकृत्य म
धीपात्राद्बिंदुमेकं स्वीकुर्यात् यथा कुंडलिनीं आज्ञिह्वां नीत्वा ध्यात्वा ॐ अहं यं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि अहमस्मि
ब्रह्माहमस्मि सोऽहमस्मि अहमेवाहं मां जुहोमि स्वाहा इति श्रीपात्राद्बिंदुमेकं स्वीकुर्यात् ॐ त्वमेव प्रत्यक्षं ब्रह्मासि त्वमेव प्रत्यक्षं ब्रह्मावाद
ष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु तन्मवतु मामवतु वक्तारमित्येवं बिंदुमेकं स्वीकृत्य ॐ यश्छन्दसान्तस दश्छन्दोभ्योऽध्या
मृताभुवसमेन्द्रो मेधयामिनो अवतु भुविश्वरूप मे गोपयन्तु इति पुनः स्वीकृत्य भूजपेदिति स्वात्ममूलत्रिकोणात् स्वकोटिसूर्यसमप्र
रंनरनि भो कुंडल्याकाराविद्युल्लतेव अस्य मंत्रकं अतनिर्गमधनमेधमाने मायाधकारयोरि पयिमि संविदग्नौ कस्मिंश्चिदद्भुतमरीचिवि
लासभ्रमो विश्वं जुहोमि वस्तुधारां शिवावसानं २ इदं ताप्रत्रसंभूते महता परमामृते परहंतायेवं होमं जुहोमि शिवरूपतां अथ
यंत्रपूजामारभेत् बिंदुत्रिकोणाष्टकोणमष्टपत्रं भूगृहं वृत्तद्वयात्मकं इष्टदेवतास्वरूपं यंत्रं निर्माय पुरतो निधाय कूर्मपीठन्या
सक्रमेणागंधाक्षतादिना पीठपूजां विधाय ऋष्यादिकरषडंगन्यासं कृत्वा करकच्छपिकया मुद्रया पुष्पाक्षतं गृहीत्वा मूलाधा
रात्कुंडलिनीं ब्रह्मरंध्रपर्यंतं विभाव्य तत्प्रसादमनलोलीभूतां हृदयकमले समानीय तद्देहे स्वेष्टदेवतां ध्यायेत् यथा रूवौं
करवंड विद्यां ध्यात्वा इति यामिति बीजेन वामनासापुटेन पुष्पे समारोप्य देवि शिभक्तिसुलभे परिवारसमन्विते याव
त्वां पूजयिष्यामि तावद्देवि स्थिरा भव एवं स्वधामंत्रेण उत्पन्न पुष्पं हं मंत्रेणों ह्रौं यंत्रोपरि निधाय आवाहनमुद्

यामूलेन ॐ ह्रीं श्रीं राज्ञाभवानी आत्मन्यंत्रे इहागच्छ २ सांगां सायुधां सपरिवारां सवाहनां इहागच्छ इह तिष्ठ २ सन्नि-
धेहि २ इह सन्निरुद्धस्व २ इह सन्मुखीभव २ षडंगेन सकलीकृत्य अस्त्रेणासंरक्ष्य कवचेनावगुंठ्य वामाति धेनुमुद्रयामृतीकृत्य स-
महामुद्रया परमीकृत्य मध्यमयास्पृष्ट्वा जीवन्यासं विधाय प्राणप्रतिष्ठां सर्वमंत्राः संजप्य देवतानाम पूर्वकं स्वायुधमुद्रा
प्रदर्श्य स्वागतं कुशलं इदमासनमास्यतां इत्यभिलाष्य मूलमुच्चार्य श्रीराज्ञाभवानीश्रीपादुकां पूजयामि तर्पयामि
नमः इत्यहस्ते पुष्पं गृहीत्वा वामे भौ पुंडरीकं गृहीत्वा सांगां सपरिवारां सवाहनां सायुधां सदाशिवसहितां पूजयामि तर्पयामि नमः इति विशे-
षार्घ्यं इति शिरसि नत्वा पुष्पाञ्जलिं मूलान्ते पाद्यं नमः पादयोः दद्यात् मूलान्ते अर्घ्यं नमः शिरसि मूलान्ते आचमनीयं मुखे मू-
लान्ते मधुपर्कं स्वधा इति मुखे मूलान्ते आचमनीयं स्वाहा मूलान्ते स्नानीयं नमः इति सर्वांगे पंचामृतस्नानं पुनः शुद्धोदकस्नानं पुन-
स्वाहा राचमनीयं मुखे मूलान्ते पुष्पाणि वौषट् मूलान्ते धूपं नमः मूलान्ते दीपं नमः मूलान्ते मुकुटं रत्नताटंकं नानामौक्तिकग्रैवेयकहार
केयूरकंकणांगुलीयक नवबंधन मध्यकांचीकलाप कटिनूपुर पादांगुलीयकादिना जातीचंपकमालतीकल्हार पद्म नानापुष्पैर्भू-
षयित्वा सर्वांगे महामृगमदकुंकुमलेपनं भाले रत्नांजनं आदर्शं छत्रं चामर व्यजन सर्वोपचारैः संपूज्य नैवेद्यं पुनराचमनीयं
ताम्बूलं दत्त्वा पुष्पांजलित्रयं दत्त्वा परिवारदेवताः पूजयेत् वराभयकराः सर्वे रक्तांबरविभूषिताः स्वशक्त्यालंकृताः पंचैते स्नानमु- शिवः
द्राधरास्तथा इति ध्यात्वा तर्पयेत् नत्वा दिव्यौघगुरुपादुकां पूजयामि तर्पयामि नमः सिद्धौघगुरुपादुकां पूजयामि ११

नर्पयामि नमः मानवौघगुरुपादुकां पूजयामि तर्पयामि नमः इति पंक्तित्रयं पूजयेत् चतुर्थपंक्त्यां स्वगुरुचतुष्टयं स्वस्वनाम्ना संपूज्य मू
लमंत्रं सप्तवारं ध्यानमंत्रं पठेत् ततः पुष्पांजलिं समादाय साङ्गां सपरिवारकां भक्त्या समर्पयेत् क्रमगुरुपंक्तिपूजनं पूज्यपूजनक्रमो मे
धेप्रावी पुष्पांजलिं देवतां मूलेन दत्त्वा षडंगदेवताः पूजयेत् अग्नीशासुरवायव्यमध्यदिक्ष्वंगपूजनं तत्रान्तरे इच्छा हृदयमाग्ने
य्यां मैशान्ये तु शिरो याजेन अभ्यर्थ्य गुरु तो नेत्रं दिक्ष्वस्त्रमत्यार्चयेत् तद्यथा ॐ हृदयदेवी श्रीपादुकां० श्रीं शिरोदेवी श्रीं ह्रीं शि०
खादेवी श्री० क्लीं कवचदेवी श्री० स्वां नेत्रदेवी श्रीपा० तां अस्त्रदेवी श्री० इति गंधादिना विशेषार्घ्यबिंदुभिः संतर्प्य अग्न्यसुरवा
ङ्गः श्रीं यं श्रीं पतिः पार्वतीमीश्वरं च रतिकामदेवं षडंगेन सार्द्धं अग्न्यादिषट्कोणे कुललक्ष्म्याद्याः पीठ पूजयेत् लक्ष्मीं हेमप्र
भां नवीं सर्वराज्यप्रदाभयां वज्रशंखगदाम्भोजधरं हेमसन्निभं हरिं नीलोत्पलकरां सौम्यां रतिकांचनसन्निभां धनपाशांकुशाख्यासपुष्पेषुमकरां०
स्मरं पद्मवल्लिनिधियुग्मं तद्वद्दुर्भयपार्श्वयोः षट्कोणपार्श्वयोः शंखनिधेयपद्मनिधे तद्वत् वमहिमायुद्धिमायपूजयेत् अथ षट्को
णे पूजयेत् ॐ दुं दुर्गादेवी श्रीपादुकां पूजयामि ॐ ऐं चामुण्डादेवी श्रीपादुकां ॐ सौं रक्तदन्तिकादेवी श्रीपादुकां पू० ॐ क्लीं कात्यायनी दे
वी श्रीपादुकां पू० इति गंधादिभिः संपूज्य संतर्प्य मूलेन पुष्पांजलिं समर्प्य अष्टदले ब्राह्म्यादिमातृकाः पूजयेत् ततो ब्राह्म्यादिशक्तीनां ध्या
नं ब्राह्मीं हंससमारूढां स्वर्णवर्णां चतुर्भुजां घंटां शंखकपालं च अक्षस्रजं च पंकजं दंडं पद्मासनस्थं च दधतीं चारुहासिनीं जटाजूटधरां
देवीं भावयेत्साधकोत्तमः ॐ श्रीं ब्राह्मी श्रीपा० नारायणीं महादीप्तां श्यामांगां गरुडवाहिनीं नानालंकारसंयुक्तां चारुकेशीं चतुर्भुजां घं
टां शंखं कपालं च चक्रं संदधतीं परां मधुमत्तां मदोल्लासहर्षां सर्वांगसुंदरीं ॐ ह्रीं ऐं नारायणी श्रीपादुकां पू० महेश्वरीं वृषारूढां शुक्लां

त्रिनयनान्वितां कपालं डमरुं चैव वरदाभयमथ शूलकं टंकं च दधतीं देवीं नानाभरणभूषितां ॐ श्रीं ऊं माहेश्वरीश्री० चामुंडा चंडहासप्रकटित
दशनां भीमवक्त्रां त्रिनेत्रां नीलांभोजप्रभाभां प्रमुदितवपुषं नारमुंडालिमालां खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयंतीं प्रेतारूढां
प्रमत्तां मधुमदमुदितां भावयेच्चंडरूपां ॐ ह्रीं ऋं चामुंडाश्रीपा० कौमारीं कुंकुमाभां च त्रिनेत्रां शिखिवाहनां चतुर्भुजां शक्तिपाशमंकुशा
भयधारिणीं नानालंकारसंयुक्तां प्रमत्तां परिचिंतयेत् ॐ श्रीं लृं कौमारीश्रीपा० अपराजितां चपीनाभां अक्षसूत्रवरप्रदां कमलं मातु(
१२ लिंगं च दधतीं परिचिंतयेत् ॐ ह्रीं लें अपराजिताश्रीपा० वाराहीं धूम्रवर्णाभां वराहवदनां शुभां फलकं खड्गमुशलं हेवेद्भुजैर्धृतां ॐ श्रीं स्रों
वाराहीश्रीपा० नारसिंहीं नरसिंहस्याविभ्रतीं सदृशं वपुः ॐ ह्रीं यः नारसिंहीश्रीपा० इति वामावर्त्तेन गंधादिभिः पूजयेच्च मूलेन विंदौ पुष्पांजलिं द
द्यात् ततो भैरवान् ध्यायेत् दधतो जनपुंज नीलवर्णान् रुद्रेनालकपालशूलदंडान् लघुडंडमिसंयुता स्त्रिनेत्राः करदंडोपरि हस्तदंड
खंडैः गजकृत्तिनिर्वासिततोत्तरीयान् भ्रुकुटीसंघटिते ललाटपट्टे ललिताभिलिंगलाभमंगलाध्यान मुदितांतःकरणान्सुयौवनाढ्यान् इति ध्या
त्वा अग्न्यादिवामावर्त्तेन पत्राग्रे भैरवपात्रेणापूजयेत् ॐ ह्रीं असितांगभैरवश्रीपा० पू० ॐ ह्रीं रुरुभैरवपादुकां पू० ॐ ह्रीं चंडभैरवश्रीपा० ॐ
ह्रीं क्रोधभैरवश्रीपा० ॐ ह्रीं उन्मत्तभैरवश्रीपा० ॐ ह्रीं कपालीभैरवश्रीपा० ॐ ह्रीं भीषणभैरवश्रीपादुकां पू० ॐ ह्रीं ॐ ह्रीं संहारभैरव
श्रीपा० इति भैरवपात्रामृतेन संपूज्य संतर्प्य मूलेन पुष्पांजलिं दत्वा लोकपालान् पूजयेत् ॐ लं इंद्रश्रीपादुकां पूजयामि तर्पयामि
नमः ॐ रं अग्निश्रीपा० ॐ टं यमश्रीपा० ॐ क्षं निरृतिश्रीपा० ॐ वं वरुणश्री० ॐ यं वायुश्रीपा० ॐ कं कुबेरश्री० ॐ हां ईशान
श्रीपा० ॐ ब्रं ब्रह्माश्रीपा० पूर्वैशानयोर्मध्ये ॐ ह्रीं अनंतश्रीपा० निरृतिवरुणयोर्मध्ये तदग्रे तदस्त्राणि पूजयेत् ॐ वज्रश्रीपा० शिवः
ॐ शक्तिश्री० दंडश्रीपू० ॐ खड्गश्रीपू० पाशश्री० ॐ अंकुशश्री० ॐ गदाश्री० ॐ त्रिशूलश्री० ॐ पद्मश्री० ॐ चक्रश्री० १ इति १२

गंधादिभिः संपूज्य मूलांते सर्वानंदमयाय विंदुचक्राधिष्ठात्र्यै नमः इति पुष्पांजलिं समर्प्य वटुकादीनां बलिं दद्यात् यथा त्रिकोणाद्बहि
श्चतुरस्रमंडलं कृत्वा वं वटुकाय नमः इति गंधादिभिः संपूज्य ॐ ह्रीं एह्येहि देवीपुत्र वटुकनाथ कपिलजटाभारभासुर त्रिनेत्र
ज्वालामुख सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा एष बलिः वं वटुकाय नमः इति वामांगुष्ठानामिकाभ्यां बलि
मुत्सृजेत् इति संपूज्य बलिपात्रमादाय तेन बलिमुपनीय ऊर्ध्वब्रह्माण्डतो वा दिवि गगनतले भूतले निष्कले वा पाताले वानले
वा सलिले यो वा यत्र कुत्र स्थिता वा क्षेत्रपीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलिविधिपा
न्तु वीरेंद्रवंद्या यां योगिनीभ्यः स्वाहा सर्वयोगिनीभ्यो हुं फट् स्वाहा एष बलिः योगिनीभ्यो नमः इति तत्त्वमुद्रया बलिमुत्सृजे
त् ततः पश्चिमे पश्चिमे पूर्ववन्मंडलं कृत्वा क्षेत्रपालमभ्यर्च्य क्षां क्षेत्रपालाय नमो बलिमुपनीय बलिपात्रमनेन ॐ क्षां क्षीं क्षूं
क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण २ स्वाहा एष बलिः क्षेत्रपालाय नमः इति बलिमुत्सृजेत्
तत्त्वमुद्रया ततः उत्तरे पूर्ववन्मंडलं कृत्वा गं गणपतये नमः इति संपूज्य गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं मे वशमानय स
र्वोपचारसहितं बलिं गृह्ण २ स्वाहा इदं बलिं संकल्पितां गृहीत्वा नामध्ये हस्तेन निधाय तर्पयेत् एष ते बलिः गणपतये नमः ततः स्ववामे चतु
रस्रमंडलं कृत्वा ततः सर्वभूतेभ्यो नमः इति गंधादिभिः संपूज्य ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः स्वाहा एष बलिः सर्वभूतेभ्यो नमः तत्त्वमुद्र
योत्सृजेत् अशक्तश्चेत् सर्वभूतेभ्यो बलिमेकमाहरेत् ततः प्राणायामत्रयं कृत्वा विंदौ पुष्पांजलित्रयं दत्त्वा गंधाद्युपचारैः पूज

येद्यथा मूलांते परमानंदसौरभ्यपरिप्लुतदिग्गंतरोद्गारहारपरमगंधं कल्पयामि परमेश्वरि श्रीमाघाभवानीं सांगां सावरणां सवाहनां साउधां सालं
कारसहितां गंधं समर्पयामि नमः कनिष्ठांगुष्ठेन गंधं दद्यात् गंधमुद्रां प्रदर्श्य मूलांते ॥ तुरीयवनसंभूतं नानागुणमनोहरं अमंदसौरभं पुष्पं गृ
षारत्रयं ३ ह्यतामिदमद्भुतं इति सांगोतिपुष्पाणि तावीशषट् तर्जन्यंगुष्ठयोगेन वारत्रयं दद्यात् अधोमुखं कृत्वा पुष्पमुद्रां प्रदर्श्य शालितंडुलसंमिश्रं मुकाफ
लमयसंपिंडितान् अक्षतान् बहून् हंसदेवेशि क्षीरसागरशोभिनि अनामामध्यमांगुष्ठेनाक्षतान् गृहीत्वा वरदयंत्रेषु मुद्राः प्रदर्श्य ततो धूपपात्रे फडि
ति संप्रोक्षनमः इति धूपे पुष्पं दत्वा ॐ जगधनि मित्रमातः स्वाहेति गंधपुष्पाभ्यां धंटां संपूज्य वामहस्तेन घंटां वादयन् दक्षिणेन धूपं गृहीत्वा दे
वीं धूपयेत् मूलांते वनस्पतिरसोद्भूतो गंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां शंखजलमुत्सृजेत् कर्पूरगोघृतैर्लक
लो स्त्रत्रं कर्पासनिर्मितं दीपं गृहाण देवेशि त्रैलोक्यतिमिरापहं वीहमंत्रेणामध्यमांगुष्ठेन हत्वा त्रिवारं भ्रामयेत् सुप्रकाशो महादीपः सर्वत्र तिमि
रापहः सबाह्याभ्यंतरज्योतिर्दीपोयं प्रतिगृह्यतां इति दीपं नेत्रादिपादपर्यंतं नवधा पंचधा त्रिधा वा दीपं प्रदर्श्य शंखजलमुत्सृजेत् सिंदूरकुंकु
मेषिचंद्रगोघृतं तं समन्वितं क्षिपान् षोडशसंख्याकैर्धूनमध्ये पावयेत् कुमारीनिर्मितसूत्रं कर्पूरेण समन्वितं गोघृतैः पूरितं कृत्वा
कांस्येऽभ्र षद्दलं लिखेत् स्थापयेत्पात्रे भूमौ हृन्मंत्रेण ज्वालयेत् वंधुकेन ततः प्रोक्ष गंधपुष्पादिना यजेत् वाग्भमंत्रेण ततो धृत्वा
मंत्रमुच्चारयेत्प्रिये मूलमंत्रसमुच्चार्य देवि विघ्नेशो वप्रदीपिति त्रैलोक्यतिमिरौघविनीराजनं शिवार्चित त्रिवारं शिरसि भ्राम्य त्रिवारं हृदयोप
रि त्रिवारं पादयोर्भ्राम्य त्रिवारं सर्वं मधस्तथा इति नीराजनं ततः स्वेष्टदेवतां पुष्पांजलिं दत्वा ततस्त्ववशुकृविधिनास्वेष्टदेवतामारा
ध्य सन्मुखे दक्षिणावामे त्रिकोणं वृत्तं विधाय तदुपरि आधारं निधाय ततो नैवेद्यं षड्रसान्नव्यंजनादिकं तीर्थो सर्वं शुद्धिमीन मुद्रान्वि शिवः

तं षड्रसं रक्तपुष्पान्वितं स्वर्णादिभाजने तदा धारोपरि निधाय फडित्यर्घोदकेनाभ्युक्ष्य चक्रमुद्रयाभिरक्ष्य यमिति वायुबीजेन संशोष्य रमिति व
ह्निबीजेन संदह्य वमिति वरुणबीजेन कवचेनावगुण्ठ्य धेनुमुद्रयामृतीकृत्य मूलमन्त्रं तदुपरि सप्तधा जप्त्वा अर्घोदकेनाभ्युक्ष्य सुधारससरस
स्वादु परमानन्दनिर्भरे अपारभवसंसारे पाहि मां परमेश्वरि मूलेन गंधपुष्पैरभ्यर्च्य वामांगुष्ठानामिकाभ्यां नैवेद्यपात्रं धृत्वा इतिरा
करेण शंखं गृहीत्वा मूलान्ते नैवेद्यं षड्रसोपेतं पंचभक्ष्यसमन्वितं सुधारसमहोदारं शिवे संगृह्यतां इत्यनेन नैवेद्यशंखोदकमु
त्सृजेत् ततो ग्रासमुद्रयामृतं नाम ह्लौं नाशय इति ग्रासं(?) … शुद्धिं गृहीत्वा मूलान्ते इदं शुद्धिसहितमासवं मधुकं देवतायै निवे मू
दयामीति देवतामुखपंकजे निवेद्य स्ववामे … शुद्धेश्वाधारोपरि संस्थाप्य तृतीयासहितमासवं शुद्धिसहितमासवं दत्वा तथैव सं
स्थाप्य पात्रवन्दनं कुर्यात् षड्रसैः समोपेतं पक्वान्नं शालिसंभवं ॐ भक्ष्यासवसारे स्मिं परमानन्दनिर्भरे अपारे भवसंसारे पाहि मां
परमेश्वरि इत्यासवं निवेद्य गजवक्त्रमुद्रया ॐ कालि २ महाकालि इदं शुद्धिमन्नं विधिवत्स्वाहं कुरु २ स्वाहा इति शुद्धिं निवेद्य वा
मांगुष्ठानामिकया रसात्मकमये देवि भवानी सिद्धिदायिनी मीने ग्रहाण देवेशि जगद्दर्पं कुरुष्व मे मीनमुद्रां प्रदर्श्य निवेद्य अखण्डमण्ड
लाकारे विश्वव्यापिपरे शिवे मुद्रां गृहाण देवेशि मम सान्ध्यं च साधय इति मुद्रां निवेद्य क्षीरसागरसंभूते अमृतात्सर्वरूपिणि अमृतं
गृहाण देवेशि जलामृतरसप्रिये योनिमुद्रया निवेद्य रसैः षड्भिः समोपेतं पक्वान्नं शालसंभवं बलिमांससमायुक्तं नैवेद्यं भक्तिवत्सले
गृहाण परया भक्त्या भीष्टं देहि मे शिवे श्रीपात्रामृतेन गायत्र्या संप्रोक्ष्य धेनुमुद्रयामृतीकृत्य मत्स्यमुद्रयाच्छाद्य अस्त्रेणावगुण्ठ्य
अमृतेश्वरि श्री भवानी अमृतं कुरु २ स्वाहा पंचांगुलिं मेलयित्वा निवेदयेत् इत्याद्यादिसमायुक्तं कर्पूरागुरुलोडितं तोयं गृहाण देवे

यं

शिहेमादिकुलसंभूम्भिर्व इत्याचमनं ॐ अमृतोपस्तरणमसि स्वाहेति देव्या हस्ते जलं दद्यात् ततो वामहस्ते नावकचोत्पलसदृशीं ग्रासमुद्रां प्रदर्श्य
दक्षिणे करे प्राणादिपंचमुद्राः प्रदर्शयेद्यथा ॐ प्राणाय स्वाहेति अंगुष्ठकनिष्ठानामाभिः ॐ अपानाय स्वाहेत्यंगुष्ठतर्जनीमध्यमाभिः
ॐ व्यानाय स्वाहेत्यंगुष्ठमध्यमानामाकनिष्ठाभिः ॐ उदानाय स्वाहेत्यंगुष्ठतर्जनीमध्यमानामाभिः ॐ समानाय स्वाहेत्यंगुष्ठादिसर्वाङ्गु
लीभिः ततो भुक्तवत्यै हस्तोदकमाचमनीयं जातीफललवंगादिनागवल्लीदलैर्युतं नानापक्वफलैर्युक्तं तांबूलं प्रतिगृह्यतां पूगीफलं ना
लिकेरं जंबीरपनसं तथा दाडिमं द्राक्षसंयुक्तं फलेभ्यः समयोद्भवैः फलेन पूजिता देवी सर्वकामप्रदायिनी पातालरससंभूतं कर्पूरादिसु
वासितं मया निवेदितं देवि तांबूलं प्रतिगृह्यतां तांबूलं समर्पयामि नमः हिरण्यरौप्यरत्नानि मणिमुक्तासमन्वितैः दक्षिणां गृह्ण देवे
14 शि सर्वकामं सदा दक्षिणां देव्या वामकरे निवेदयेत् सांगमंत्रं पठन् छत्रचामरपादुकामाल्यधान्यव्यजनवादित्रगीतमांगल्यस्तुतिपठन्
सिंदूरं कज्जलं दर्पणं कुंकुमं अष्टगंधं चावरिता श्रीभवानी देव्यै प्रत्येकमंत्रेण समर्पयेत् ततः स्नानं स्नानप्रयोक्तव्यसांगसहि
तं कामसामहामायकालिके भक्तवत्सले परिक्रम्य मया भक्त्या भवानी पापनाशिनी इति पुष्पांजलिं दत्त्वा परिक्रम्य प्रदक्षिणात्रिधावा स
र्वभूतहिते देवि सर्वभूतहृदिस्थिते सर्वकामप्रदे देवि नमस्ते हरिवल्लभे अनेन स्थित्वा पुष्पांजलिं निःसमर्प्य ॐ नमो ... देवि दुःस्वप्न
नाशकारिणी सिंदूरं गृह्यतां देवि वशंकुरु जगत्त्रयं तर्जन्यंगुष्ठेन दद्यात् तिरस्कारिणी नयनं कज्जलं योषितां कर्णरांकुरपादप्यां दद्यात्
सुगंधसुमनोहारि नानागंधसमन्वितं सुगंधं गृह्यतां देवि धारणेन वशं ... यात् सर्वगंधं दद्यात् नर्मदा देवदेवेशि विश्वमूर्ते नमोस्तु ते वि शिवः
ध्यानरहिते स्थापित विश्वदर्पणं ... स्थिते तद्दर्पणं दद्यात् विद्योत्यात्मिं स्थिर विद्योतने निर्मले गगने अद्रीभूतं कान्तं विश्वं छत्रं च प्रतिगृह्यतां सुरभि
वनसंभूतं इन्द्रादिकरमंडितं चामरं गृह्यतां देवि नमस्ते राज्यदायिनि अथ बलिदानविधिः स्वर्णादिपिशितं एकी कृत्य बलिपात्रामृतेन प्रक्षाल्य परक १४

रंदनगंधपुष्पाक्षतान्यधिनिक्षिप्याधिवासनं कारयेत् ततो दक्षिणभागे चतुरस्रं त्रिकोणमंडलं कृत्वा तत्र देवीं ध्यात्वा मूलेन पु
ष्पाक्षतैः संपूज्य मूलेन सदाशिवसहितं वा निमृतस्रजेत् संतर्प्य मूलेन पुष्पांजलित्रयं दत्त्वा ततः स्वांगत्वेन
नित्यहोमं कुर्यात् यथा स्वामे दक्षिणहस्तप्रमाणं हस्तार्धं वा चतुरंगुलं शुलं तत्र स्थंडिले कृत्वा तत्र मूले
न वीक्ष्य फडिति संप्रोक्ष्य तेनैव दर्भेण संताड्य होमद्रव्यं परिषिंच्य तत्र यंत्रं विभाव्य मूलेन देवीं
तत्रावाह्य गंधपुष्पोपचारैः संपूज्य मूलेनाग्निं स्थापयित्वा आज्येन व्याहृतिभिर्हुत्वा मूले
नाष्टोत्तरशतं पंचविंशति संख्या वा हुत्वा पुनर्व्याहृतिभिर्हुत्वांगं धाधेः संपूज्य दे
वतां पीठे संयोज्य वह्निं विसर्जयेत् भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक कर्मांतरेऽपि संप्राप्ते गच्छ देव यथासुखं इति नि
त्यहोमः ततः स्वेष्टदेवतां पुष्पांजलिं दत्त्वा ऋष्यादिकरषडंगं कृत्वा देवीं ध्यात्वा मालां पूजयेत् ॐ माले महामाले
सर्वशक्तिस्वरूपिणी चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव इति मंत्रेण मालां संपूज्य ॐ गंध्राविघ्नं कुरु माले
त्वं जपकाले सदा मम इत्यनेन मंत्रेण दक्षहस्ते मालां गृहीत्वा स्वशिरसि गुरुं कंठे [illegible] मंत्रपीनवर्णं हृदये स्वेष्टदेवतां शिव:
ध्यायन् हृदयसमीपे मालामानीय दक्षहस्तमध्यमांगुलिमध्यपर्वणि संस्थाप्य तदेकाग्रमनाः युतं वा सहस्रं वा १४
अष्टोत्तरशतं वा मूलमंत्रं प्रणवसंपुटितं यथाविधि जपेत् करमालया वा ततः संख्यापूर्तौ पुनः प्रणवमुच्चार्य

नमः समाप्य त्वं मातेः सर्वदेवानां प्रीतिदा शुभदा भवः शुभं कुरुष्व मे देवि यशो वीर्यं प्रयच्छ मे इत्यनेन मंत्रेण मालां स्वशिरसि संस्था
प्य जयांते समर्पयेत् ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि इति चुलुकोदकेन
देव्याः वामकरे समर्प्य ॐ ह्रीं सिद्ध्यै नमः इति मंत्रेण पुनर्मालां संपूज्य ततो निर्माल्यं नैवेद्येन ईशान्ये निर्माल्यदेव्यै दद्यात् ॐ नि
र्माल्यदेव्यै नमः ततः श्वासम्य प्राणायामं ऋष्यादिकरषडंगन्यासं कृत्वा पंचमुद्राभिः नमस्कुर्यात् तामनंतरं स्तवं समस्यगांमु
षमेव च योनिमुद्रेति विख्याता पंचमुद्राः प्रकीर्तिताः इत्यनेन प्रणम्य ततः कवचसहस्रनाम स्तोत्रादिकं पठित्वा ॐ इतः पूर्वं
प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना
यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा इत्यनेन देव्याः वरणारविंदयोरात्मानं समर्[illegible] श्री मातः क्षम
स्वेति तालत्रयेण प्रबोध्य ततो मं यंविविंम्य संहारमुद्रया निर्माल्यपुष्पेण तत्तोय समुद्धृत्याघ्राय पूरकयोगेन
सहस्रकमले प्राप्य एतत्त्वं तत्त्वेषु ध्यात्वा स्वात्मना ऐं हृदयाय नमः इति हृदयमानीय तत्र तेन ध्यात्वा कमल
ॐ उत्तिष्ठ तिष्ठ परं स्थानं स्वस्थाने परमेश्वरि यत्र ब्रह्मादयो देवा सुरास्तिष्ठंति मे हृदि इति हृदयकमले देवीं स्था
पयित्वा यंत्रेण निर्मील्य गंधं ललाटे तिलकं कृत्वा यंत्रे शंखोदकेन स्नापयित्वा गंधं दत्वा शुद्धस्थाने स्थापयेत् वा यथास्वं विवि शिव:
हरेत् कुमारीस्वासिनी वटुकगुरुं ज्येष्ठान् कुलीनान् संपूज्य तत्रादौ कुमारीपूजनं ब्राह्मणी क्षत्रिया वैश्याश्च शिव: १४
शूद्राधिक कन्यका रजकी चांडाली तथा गोपाल कन्यका कुमारीस्तु दरीमुख्यानवबर्षादर्धःक्रमात् बाला १५

न

मन्त्रं समुच्चार्य कुमारीकुलनायके पूजयामि वरारोहे मंत्रसिद्धिं प्रयच्छ मे अनेन मंत्रेण पाद्याद्युपचारैः संपूज्य किंचिन्नैवेद्यं द
द्यात् ताम्बूलं दक्षिणां च प्रदक्षिणीकृत्य नमस्कृत्य ऐं वासिनी पूजा ऐं वासि। नीं शुभगां देवीं ऐं ह्रीं श्रीं चारुहासिनीं व
धूबीजं समुच्चार्य कामराजं ततो वदेत् ऐं वानीं ऐं भगां देवीं ऐं सर्वसौभाग्यदायिनीं सर्वसंमोहनकरी एहि हर
वल्लभे अनेन मंत्रेण पाद्याद्युपचारैः संपूज्य दक्षिणां दत्त्वा विसर्जयेत् वटुकाय च पूर्ववत् वटुकमंत्रं समुच्चार्य स
र्वविघ्नविनाशय सोमसूर्याग्निलोचन ज्वालामालिनि सर्वसौभाग्यदायिक त्रैलोक्यवीजा विष्णुस्वरूप सर्वजनवं
शिने संघ पाद्याद्युपचार सहितं संपूज्य नमस्कृत्य देवीपुत्र नमस्तेस्तु सर्वविघ्नं प्रणाशय पूजां गृहाण देवेश मंत्र
सिद्धिं प्रयच्छ मे। विसर्जयेत् गुरुपादुकामंत्रेण गुरुपादाम्बुतेन स्वशिरसि गुरुपरमगुरुपरमेष्ठीगुरुपराप
रगुरून् त्रिः त्रिः संतर्प्य पाद्याद्युपचारैरभ्यर्च्य परिक्रम्य प्रदक्षिणां दत्त्वा नमस्कृत्य देव्ये पुष्पाञ्जलिं दत्त्वा
त्रिः संतर्प्य ततः सर्वैः समवायकैः सहितं पंचोपचारसहितं षड्संख्येष्ठानुक्रमं पात्रवंदनं कुर्यात् आदौ शक्ति
हस्ते दद्यात् मंत्रः आलिपात्रमिदं गृह्य क्षीयते पिशितेन वा स्वीकृत्य शुभगे देवि यशो वीर्यं वदेहि मे अनेन मंत्रेण
शक्तिहस्ते पात्रं दद्यात् ततः शक्तिवाक्यं यत् शक्तिहस्तादहं आलिपात्रं मया दत्तं मीनशेषं कलामृतं तवशर्क्कर

हरिब्याभिसर्वाभीष्टंददामिते मलेमलाधारनिवासिनि वीरेभुवर्वरांदद्यात् अहो वीर हस्ते वर्वरांदत्वाप
आत्मात्रं हे यं वीरे भुव भो भो वीर नमस्तुभ्यं सर्वविघ्नविनाशक भैरवी ग्रसिता ग्रसिता न स्तेव प्रसन्नो भव सर्वदा न
त्रयेभ्यःकं स्वीकृत्य कुलकुंडलिनी हंसः सोहं श्रीभवानीदेव्यै आत्मतत्वायस्वाहा विद्यातत्वायस्वाहा शिव
तत्वायस्वाहा सर्वभूतं एकीकृत्याविभाज्य हंसः सोहं ॐ सर्वतत्वायस्वाहा इतितत्वत्रयैः श्रीचक्रकरा
दिनवश्लोकैः पात्रवंदनं कृत्वा यंयंस्पृशामिहस्तेश्च यंयंपश्यामि चक्षुषा सं येवदासतां याति
16 शाकसमोभवत् अत्र पात्रशेषं विंदुं निक्षिपेत् कनिष्ठयामध्यमलाटे विंदुं दद्यात् यंत्र
स्थाने गोमयेनोपलिप्य पुआगत्य बहिः कुर्यात् त्रिकोणं मन्त्रोत्तरं गंधपुष्पाक्षतैः सं
ज्य ध्यायेदुच्छिष्टभैरवं गदात्रिशूलडमरू पात्रहस्तं त्रिलोचनं कृष्णं भैरवं ध्यायेत्
सर्वविघ्ननिवारयेत् उच्छिष्टभैरव एह्येहि वलिं गृह्ण २ हुं फट् स्वाहा शांतिस्तोत्रं पठेत् ॥ व:
यदह्ना कुरुते पापं रात्रौ नश्यति दर्शनात् यद्रात्रौ कुरुते पापं प्रातः प्रणोविनश्यति प्रातमध्याह्न शिव:
१६

हावगतं किल्बिषं क्रमपाठेन नश्यति शक्तिसहितं पात्रामृतं स्वपत्रे कृत्वा गृहं श्रीपात्रस्थाने मायाविलि
ख्य । ह्रीं ॥ इति श्रीरुद्रयामले भवानीपूजापद्धतिः समाप्ता शुभम् ॥ श्री ॥ श्रीशिवे शोपातुनः सदा

पद्धतिः मंत्रस्नाहा॰ व॰ १